दिनाङ्क :- 10.02.2026

प्रात: - 06:55

## प्रधानमन्त्री -सेशेल्स

प्रधानमन्त्री नरेन्द्रमोदी सेशेल्स-देशस्य कृते पञ्च-सप्तत्यधिक-एकशतम्-मिलियन-डॉलर-मितस्य विशेष-आर्थिक-साहाय्य-राशेः घोषणाम् अकरोत्। नवदिल्ल्यां सेशेल्स-देशस्य राष्ट्रपतिना डा. पैट्रिक हर्मिनी इत्यनेन सह संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन् श्रीमोदी अवदत् यत् एषः विशेष-आर्थिक-साहाय्य-राशिः- सामाजिक-आवासं, ई-मोबिलिटी, व्यावसायिक-प्रशिक्षणं, स्वास्थ्यं, रक्षां, समुद्रीय-सुरक्षां च समर्थयिष्यति।

स्वास्थ्यं, ऋतुविज्ञानं, इलेक्ट्रानिक्स् तथा सूचनाप्रौद्योगिकी, सुशासनेत्यादिषु विविधक्षेत्रेषु भारत-सेशेल्स-देशयोः मध्ये सप्तसु सहमति-पत्रेषु अपि हस्ताक्षराणि जातानि । राष्ट्रपतिः द्रौपदी मुर्मूः, राष्ट्रपतिभवने, सेशेल्स-देशस्य राष्ट्रपतिने डा. पैट्रिक इत्यस्मै गौरवभोजनम् आयोजितवती । उभौ नेतारौ द्वयोः देशस्य द्विपक्षीय-सहयोगाय सहमतिं प्रकटितवन्तौ।

## प्रधानमन्त्री-मारिषस्

प्रधानमन्त्री नरेन्द्रमोदी मॉरीशसस्य समकक्षेण डॉ. नवीनचन्द्र रामगुलामेन सह दूरभाषेण वार्तालापः कृतः । सामाजिक-माध्यम-सन्देशे श्रीमोदी अवदत् यत् वार्तालापावसरे, द्वयोः राष्ट्रयोः मध्ये विशेष-ऐतिहासिक-जनकेन्द्रित-सम्बन्धान् सुदृढी-कर्तुं प्रतिबद्धतायाः पुनः पुष्टिः कृता। उभौ नेतारौ व्यापकसहकार्यस्य प्रगतेः समीक्षाम् अपि कृतवन्तौ । प्रधानमन्त्रिणा उक्तं यत् हिन्दमहासागरक्षेत्रे शान्ति-स्थिरतायाः, सुदृढीकरणार्थं भारत-मॉरिशस-देशौ मिलित्वा कार्यं करिष्यतः । श्रीमोदी अवदत् यत्, आगामिसप्ताहे ए.आइ.-इम्पैक्ट् शिखरसम्मेलने डॉ. रामगुलमस्य स्वागतं कर्तुं सः उत्सुकः वर्तते ।

## आई.सी.सी.क्रिकेट्

अन्ताराष्ट्रियक्रिकेटपरिषदा, सर्वेषु निर्धारित-आइसीसी-पुरुष-विंशतिम्-प्रतिविंशतिः विश्वचषक-क्रीडासु, पाकिस्तानस्य सहभागितायाः पुष्टिः कृता, यत्र फरवरी-मासस्य पञ्चदश-दिनाङ्के कोलम्बो-नगरे भारतेन सह प्रतिस्पर्धा वर्तते । अन्ताराष्ट्रियक्रिकेटपरिषदा एतदपि

पुष्टीकृतं यत्, बाङ्गलादेशेन प्रतियोगितायाम्, अनुपस्थितेः कृते दण्डदानस्य अवश्यकता नास्ति ।

महा-जिला-निर्वाचन

महाराष्ट्र-मण्डल-परिषद्विर्वाचने,एकत्रिंशदुत्तर-सप्तशत-आसनेषु द्विपञ्चाशदुत्तर-पञ्चशत-आसनानि विजित्य, भाजपा-नेतृत्वस्य महायुति-घटबन्धनम् विजयी-दल-रूपेण अतिष्ठत् । भारतीय-जनता-पार्टीति दलं पञ्चविंशत्युत्तर-द्विशत-आसनानि विजित्य शीर्षस्थाने वर्तते ।

उत्तरप्रदेश-आर्थिक-सर्वेक्षण

उत्तरप्रदेशः, औद्योगिकीकरणे विकासस्य गतिशक्तिं प्रदर्शयन्, स्वकीयं 'आर्थिकसर्वक्षण' प्रतिवेदनं प्रस्तुती-क्रियमाणं देशस्य प्रथमं राज्यम् अभवत् । राज्यस्य वित्तमन्त्री सुरेशखन्ना विधानसभायाः बजटसत्रे विगत-वर्षस्य राज्यसर्वकारस्य आर्थिकसमीक्षाप्रतिवेदनं प्रस्तुतवान्। सर्वेक्षणस्य अनुसारं राष्ट्रिय-अर्थव्यवस्थायां उत्तरप्रदेश-राज्यस्य योगदानं द्विसस्राब्दस्य षोडश-सप्तदश वर्षात्, चतुर्विंशति-पञ्चविंशति वर्षे अष्टौ दशमलव षट् प्रतिशतात्, नव दशमलव एकम् प्रतिशतं यावत् वर्धितम् अस्ति। सर्वेक्षणे इदमपि उक्तं यत् राज्यस्य अर्थव्यवस्थायाः आकारः पूर्वं त्रयोदश दशमलव त्रि-लक्षकोटिरूप्यकेभ्यः वर्धित्वा त्रिंशत् दशमलव द्वि-पञ्च - लक्षकोटिरूप्यकाणि यावत् वर्धितम् ।

T-20 ICC CRICKET ::

अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः विश्वचषक-क्रीडायां दिल्ल्याः अरुणजेटली-क्रीडाङ्गणे,नेदरलैण्ड्-देशःनामिबियादेशं विरुद्ध्य क्रीडिष्यति । स्थानीयसमये प्रातः एकादश-वादने मेलनं आरप्स्यते ।

पश्चात् चेन्नैनगरस्य एम.ए.चिदम्बरम्-क्रीडाङ्गणे न्यूजीलैण्ड्-देशस्य संयुक्त-अरब-अमीरात्-सङ्घस्य प्रतिस्पर्धा भविष्यति । स्थानीयसमये सायं त्रि-वादने अस्य मेलस्य आरम्भः भविष्यति। सायंकाले कोलम्बो-नगरस्य सिंहली-स्पोर्ट्स्क्लब्-क्रीडांगणे पाकिस्तानस्य अमेरिका-सङ्घस्य प्रतिस्पर्धा भविष्यति ।

।। इति वार्ताः।।